भारात्मके २द्विसहस्रपलमाने। आचितं दश भाराः स्यात् शाकटोभार आचित इत्युक्ते ४ दशभारमाने न० शाकटभारे पु०। परिमाणवाचकत्वात् ५तन्मितेऽपि। ६संगृहीते ७ व्याप्ते च। "आढकाचितपात्रात् खोऽन्यतरस्याम्" पा० "आचितं सम्भवति (खचित् सम्मिश्रयति) अवहरति पचति वा ख ठञ् वा। आचितीनः आचितिकः। आचितपरिमाणद्रव्यस्य खचित् समावेशनार्हे तदवहारके तत्पाचके च त्रि०। ठञि स्त्रियां ङीप्खे टाप्।

**आचितादि** पु० आचित आदिर्यस्य। गतिकारकोपपदात् क्तस्यान्तोदात्ततायां पाणिना पर्युदस्ते गणभेदे आचित, पर्याचित, आस्थापित, परिगृहीत, निरुक्त प्रतिपन्न, अपश्लिष्ट, प्रश्लिष्ट, उपहित, उपस्थित संहितागवि।

**आचूषण** न० आ+चूष-ल्युट्। ओष्ठसंयोगविशेषेण रसानुभवार्थे रसाकर्षके व्यापारभेदे (चोषा) विषशल्याद्यपकर्षणार्थे २ओष्ठादिसंयोगभेदेनाकर्षणे च। "नाडीयन्त्राण्यनेकप्रकाराणी"त्युपक्रम्य "तानि आचूषणार्थमिति"। सुश्रु० करणे ल्युट् ३तत्साधने(शिङ्गा) "तत्रप्रच्छिते तनुवस्त्रपटलावनद्धेन शृङ्गेण शोणितमवसेचयेदाचूषणात्" सुश्रु०।

**आच्छद्** त्रि० आच्छाद्यतेऽनेन आ+छद-णिच्-क्विप् ह्रस्वः। आच्छादने वस्त्रे घञर्थे क। आच्छदोऽप्यत्र पु०।

**आच्छन्न** त्रि० आ+छद-क्त। आवृते "मेघाच्छन्नेऽह्नि दुर्दिनम्" अमरः। [आवरणे।

**आच्छाद** पु० आच्छाद्यतेऽनेन आ+छद-णिच्-करणे घञ्।

**आच्छादक** त्रि०आ+छद-णिच्-ण्वुल्। आच्छादनकर्त्तरि

**आच्छादन** न० आ+छद-णिच्-करणे ल्युट्। आवरणसाधने १वस्त्रे भावे ल्युट्। २आवरणे न०।

**आच्छादित** त्रि० आ+छद-णिच्-क्त। आवृते।

**आच्छादिन्** त्रि० आ+छद-णिच्-णिनि। आच्छादके "स्तनयुगपरिणाहाच्छादिना वल्कलेन" शकु०।

**आच्छाद्य** अव्य० आ+छद-णिच्-ल्यप्। १आवृत्येत्यर्थे "आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम्"मनुः आ+छद-णिच्-कर्मणि यत्। २आवरणीये स्तनादौ ३गोप्ये च त्रि०। [च।

**आच्छिन्न** त्रि०आ+छिद-क्त। १बलेन गृहीते २सम्यक्छिन्ने

**आच्छुक** पु० आ+छो-बा० डु संज्ञायां कन्। (आइच्) वृक्षे।

**आच्छुरित** न० आ+छुर-क्त। १सशब्दहासे, २नखाघाते ३नखवाद्ये च। स्वार्थे क। आच्छुरितकमप्यत्र।

"सामोन्मुखेनाच्छुरिता प्रियेण दत्तेऽथ काचित् पुलकेन भेदे" भट्टिः। ४मिश्रिते च त्रि०।

**आच्छेद** पु० आ+छिद-घञ्। १समन्ताच्छेदने २ईषच्छेदने बलात्कारेण ३ग्रहणे च। ल्युट्। आच्छेदनमप्यत्र न०।

**आच्छोटन** न० आ+स्फुट-ल्युट् पृ०। अङ्गुलिमोटने (तुड़िदेओया)। [अङ्गुल्यादौ।

**आच्छोटित** त्रि० आ-स्फुट-क्त पृ०। मोटनेन कृतध्वनौ।

**आच्छोदन** न०आच्छिद्यन्तेऽत्र छिद-ल्युट् पृषो०दुतश्चोत्। मृगयायाम् अमरः।

**आच्युतदन्ति** पु०अच्युतदन्तस्यापत्यम् इञ्। आयुधजीविभेदे ततः दामन्यादि० स्वार्थे छन् आच्युतदन्तीयः। संघीभूते आयुधजीविभेदे।

**आच्युतन्ति** पु० अच्युतन्तस्यापत्यम् इञ्। आयुधजीविभेदे ततः दामन्यादि० स्वार्थे छन्। आच्युतन्तीयः। संघीभूते आयुधजीविभेदे।

**आच्युतिक** त्रि० अच्युतस्य कालः काशादि० ठञ् ञिठ् वा। अच्युतच्छात्रे ठञि स्त्रियां ङीप्।

**आञ्छ** आयामे (दीर्घविस्तारे) इदित् भ्वादि० पर०सक० सेट्। आञ्छति आञ्छीत्। आनाञ्छ-आञ्छ आञ्छिता। कर्मणि आञ्छ्यते। णिच् आञ्छयति ते आञ्चिछत्-त। सन् आञ्चिञ्छिषति। क्विप् आन् आञ्छौ। च्छोरिति सूत्रे अतुकोऽपि ग्रहणमिति आन् आंशौ इत्येके। "आञ्छितः आञ्छित्वा "आञ्छेदतिशिम्नम्"। "चक्रयोगेनाञ्छेदूर्ध्वस्थिनिर्गतम्" इति च सुश्रु०।

**आज** न० आज्यतेऽनेन आ+अज-घञर्थे क। १घृते जटा०। अजस्येदम् अण्। २छागमांसादौ त्रि०। "अलङ्कृतं कुमारं कुशलीकृतशिरसमहतेन वाससा संवीतमैणेयेन वाऽजिनेन ब्राह्मणम्, रौरवेण क्षत्रियम्। आजेन वैश्यम्"आश्व०। गृ०"गव्यमाजं तथा चौष्ट्रमाविकं माहिषञ्च यत्। अश्वायाश्चैव नार्याश्च करेण्वाश्च यत् पयः" सुश्रुतः। अजभावे घञ् न वीभावः। ३विक्षेपे आजानेयः।

**आजक** न० अजानां समूहः वुञ्। छागसमूहे।

**आजकरोण** त्रि० आजकेनोपलक्षिता रोणीनदीभेदः तस्याः सन्निकृष्टदेशादि अण्। अजसमूहोपलक्षितनदीसन्निकृष्टादौ

**आजकार** पु० अजस्यायमाजः कारो यस्य। शिववृषे त्रिपुरासुरवधकाले विष्णुना वृषभकृत्यकरणात् तस्य तथात्वम् यथा। "अथ विष्णुर्महायोगी सर्व्वतोऽव्यक्ततत्त्वतः। वृषरूपं समास्थाय प्रोज्जहार रथोत्तमम्। समा-